काश्यपो गरुडं स्तुत्वा वृक्षं दग्धमजीवयत् ।
स्वयञ्चाप्यमलो भूत्वा विद्ययान्यानजीवयत् ॥
पक्षी ओम् तं स्वाहा जापी विद्येयं गारुडी
परा ।
गरुडोऽहं गारुडं हि शृणु रुद्र ! महात्मकम् ॥”
इत्याद्ये महापुराणे गारुडे प्रश्नाध्यायो नाम
द्वितीयः ॥ * ॥ (अस्मिन् पुराणे एकोनविंशत्-
सहस्रसंख्यकश्लोका वर्त्तन्ते । यथा, देवीभाग-
वते । १ । ३ । ११ ।
“एकोनविंशत् साहस्रं गारुडं हरिभाषितम् ॥”
अस्य विशेषविवरणन्तु पुराणशब्दे द्रष्टव्यम् ॥*॥)
गारुडी विद्या गरुडपुराणे २०२ अध्यायादौ
द्रष्टव्या ॥ स्वर्णम् । इति हेमचन्द्रः ॥ विषमन्त्रः ।
इति जटाधरः ॥ (गरुडः गरुडवर्णस्तस्येदम् ।
गरुड + अण् । गरुडवर्ण इव वर्णोऽस्येति भावः ।)
मरकतमणिः । इति राजनिर्घण्टः ॥ (यथा-
रघौ । १३ । ५३ ।
“त्वया पुरस्तादुपयाचितो यः
सोऽयं वटः श्याम इति प्रतीतः ।
राशिर्मणीनामिव गारुडानां
सपद्मरागः फलितो विभाति ॥”
गरुडाकारेण सेनारचनयाधिष्ठितत्वात् महा-
व्यूहभेदः । यथा, महाभारते । ६ । ५३ । २ ।
“गारुडञ्च महाव्यूहं चक्रे शान्तनवस्तदा ॥”
एतस्य रचनायां गरुडाकृतित्वविवृतिर्यथा,
तत्रैवाध्याये । ३—८ ।
“गरुडस्य स्वयं तुण्डे पिता देवव्रतस्तव ।
चक्षुषी च भरद्वाजः कृतवर्म्मा च सात्वतः ॥
अश्वत्थामा कृपश्चैव शिर आस्तां यशस्विनौ ।
त्रिगर्त्तैर्मत्स्यकैकेयैर्वाटधानैश्च संयुतैः ॥
भूरिश्रवाः शलः शल्यो भगदत्तश्च मारिष ! ।
मद्रकाः सिन्धुसौवीरास्तथा पञ्चनदाश्च ये ॥
जयद्रथेन सहिता ग्रीवायां सन्निवेशिताः ।
पृष्ठे दुर्य्योधनो राजा सोदर्य्यैः सानुगैर्वृतः ॥
विन्दानुविन्दावावन्त्यौ काम्बोजाश्च शकैः सह ।
पुच्छमासन् महाराज ! शूरसेनाश्च मारिष ! ॥
दक्षिणं पक्षमाश्रित्य स्थिता व्यूहस्य दंशिताः ।
कारूषाश्च विकुञ्जाश्च मुण्डाः कुण्डीवृषास्तथा ॥
बृहद्बलेन सहिता वामपार्श्वे समास्थिताः ॥”
कदा चास्य व्यूहस्य प्रयोजनं तदाह मनुः ।
७ । १८६—१८७ ।
“शत्रुसेविनि मित्रे च गूढे युक्ततरो भवेत् ।
गतप्रत्यागते चैव स हि कष्टतरो रिपुः ॥
दण्डव्यूहेन तन्मार्गं यायात्तु शकटेन वा ।
वराहमकराभ्यां वा सूच्या वा गरुडेन वा ॥”
“श्लक्ष्णमुखपश्चाद्भागः पृथुमध्यो वराहव्यूहः ।
एष एव पृथुतरमध्यो गरुडव्यूहः ॥” इति तट्टीका-
कृत् कुल्लूकभट्टः ॥)
गारुडिकः, पुं, (गरुडः अधिष्ठातास्य इति
गारुडः विषनिवारणमन्त्रविशेषः । तेन चिकित्-
सति स एव आजीवो वास्येति वा । इति ठक् ।)
विषवैद्यः । इति शब्दरत्नावली ॥

गारुडी, स्त्री, (गरुडनाम्नाख्यायते इति । अण्
ङीप् च ।) पातालगरुडीलता । इति राज-
निर्घण्टः ॥ (गरुडः अधिष्ठात्री देवता अस्या इति
अण् ङीप् च । गरुडविद्या । सा च गरुडपुराणे
२०२ अध्यायादौ द्रष्टव्या ॥)
गारुत्मतं, क्ली, (गरुत्मान् गरुडस्तस्य वर्णोऽस्त्यस्य
गरुत्मान् अधिष्ठातृदेवतास्य वा इति अण् ।)
मरकतमणिः । इत्यमरः । २ । ९ । ९२ ॥
(यथा, माघे । ३ । ५ ।
“तस्योल्लसत्काञ्चनकुण्डलाग्र-
प्रत्युप्तगारुत्मतरत्नभासा ।”
पन्ना इति लोके । तस्य नामानि ।
“गारुत्मतं मरकतमश्मगर्भो हरिन्मणिः ॥”
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
गारुत्मतपत्रिका, स्त्री, (गारुत्मतं मरकतमणि-
स्तद्वर्णसदृशं पत्रमस्याः इति कप् कापि अत
इत्वञ्च ।) पाचीलता । इति राजनिर्घण्टः ॥
गार्गकः, पुं, (गर्गस्य अपत्यं पुमान् इति । “गर्गा-
दिभ्यो यञ् ।” ४ । १ । १०५ । इति गार्ग्यः
ततः कन् । “आपत्यस्य च तद्धितेऽनाति ।” ६ ।
४ । १५१ । इति यकारलोपः ।) गर्गस्यापत्यम् ।
इत्यमरटीकायां रायमुकुटः ॥
गार्गी, स्त्री, (गर्गस्यापत्यं स्त्री । “गर्गादिभ्यो
यञ् ।” ४ । १ । १०५ । इति यञ् । “यञश्च ।”
४ । १ । १६ । इति ङीप् “ततो हलस्तद्धितस्य ।”
६ । ४ । १५० । इति यलोपः ।) गर्गस्य अप-
त्यम् । इति मुग्धबोधम् ॥ (यथा, बृहदारण्यके
पञ्चमप्रपाठके ६ ब्राह्मणे ।
“अथ हैनं गार्गी वाचक्नवी पप्रच्छ याज्ञवल्क्येति
होवाच यदिदं सर्व्वमप्स्वोतञ्च प्रोतञ्च कस्मिन्नु
खल्वाप ओताश्च प्रोताश्चेति ॥” दुर्गा । यथा,
हरिवंशे । १७६ । १४ ।
“ह्रीं श्रीं गार्गीञ्च गान्धारीं योगिनीं योगदां
सदा ॥”)
गार्गीपुत्त्रकायणिः, पु, (गार्ग्याः पुत्त्रस्तस्मादागतो
वंशः इति । “पुत्त्रान्तादन्यतरस्याम् ।” ४ । १ ।
१५९ । इति वा फिञ् वा कुक् च ।) गार्गी-
पुत्त्रवंशः । अस्य रूपान्तरम् । गार्गीपुत्त्रायणिः ।
गार्गीपुत्त्रिः । इति पाणिनिव्याकरणम् ॥
गार्ग्यः, पुं, (गर्गस्यापत्यं पुमान् । “गर्गादिभ्यो यञ् ।”
४ । १ । १०५ । इति यञ् ।) गर्गस्य पुमपत्यम् ।
इति मुग्धबोधव्याकरणम् ॥ (यथा, बृहदा-
रण्यके । ४ । १ । “दृप्तबालाकिर्हानूचानो
गार्ग्य आस सहोवाचाजातशत्रुं काश्यं ब्रह्म ते
ब्रवाणीति ॥”)
गार्द्धपक्षः, पुं, (गृध्रस्य एषस्य वायमिति अण् गार्द्धो
गार्द्ध्रो वा पक्षः पत्रं यत्र यस्य वा ।) गार्द्ध्र-
पक्षवाणः । इति हेमचन्द्रः । ३ । ४४२ ॥ गार्द्ध्र-
पक्षोऽपि ॥
गार्द्ध्रं, क्ली, (गर्द्ध एव इति । चतुर्व्वर्णादित्वात्
स्वार्थे ष्यञ् ।) लिप्सा । यथा, माघे । ३ । ७३ ।
“पीत्वा जलानां निधिनातिगार्द्ध्रात् ॥”

गार्द्ध्रपत्रः, पुं, (गार्द्ध्रं गृध्रसम्बन्धिनं पत्रं पक्षः यस्य
यत्र वा ।) गृध्रपक्षयुक्तवाणः । (यथा, महा-
भारते । ४ । ४८ । २५ ।
“न हि गाण्डीवनिर्म्मुक्ता गार्द्ध्रपत्राः सुतेजनाः ।
अन्तरेष्वेव तिष्ठन्ते गिरीणामपि दारणाः ॥”)
गार्भिणं, क्ली, (गर्भिणीनां समूहः इति । “भिक्षा-
दिभ्योऽण् ।” ४ । २ । ३८ । इति अण् ।)
गर्भिणीसमूहः । इत्यमरः । २ । ६ । २२ ॥
गार्हपत्यः, पुं, (गृहपतिर्यजमानस्तेन संयुक्तः इति ।
“गृहपतिना संयुक्ते ञ्यः ।” ४ । ४ । ९० । इति
ञ्यः ।) गृहपतिर्गृहस्वामी तेन नित्यसम्बद्धः ।
इत्यमरभरतौ ॥ यज्ञीयाग्निविशेषः । (यथा,
ऋग्वेदे । १० । ८५ । २७ ।
“इह प्रियं प्रजया ते समृध्यता-
मस्मिन् गृहे गार्हपत्याय जागृहि ॥”
भक्तिवर्द्धनाय पितापि गार्हपत्याग्नित्वेन पुत्त्रा-
दिना वेदितव्यः इत्युपदिदेश भगवान् मनुः ।
यथा । २ । २३१ ।
“पिता वै गार्हपत्योऽग्निर्माताग्निर्दक्षिणः
स्मृतः ॥”)
गालनं, क्ली, (गाल्यते इति । गल् + णिच् + भावे
ल्युट् ।) क्षारणम् । छाँकन गड़ान इत्यादि
भाषा ॥ यथा । “तथा पचेत् यथा दारुकाठि-
न्यातिशैथिल्यमण्डगालनरहितोऽन्तरुष्णपक्वश्चरु-
र्भवति ।” इति भवदेवभट्टः ॥
गालवः, पुं, (गाल्यते नाश्यतेऽज्ञानमनेन इति ।
गल् + णिच् + घञ् । गालः वेदान्तादिज्ञानप्रति-
पादकशास्त्रं तं वाति गच्छति जानाति वा ।
वा + कः ।) मुनिविशेषः । (यथा, भागवते ।
८ । १३ । १५ ।
“गालवो दीप्तिमान् रामो द्रोणपुत्त्रः कृपस्तथा ॥”)
लोध्रवृक्षः । इति मेदिनी । वे । ३७ ॥ श्वेतलोध्रः ।
इत्यमरटीकायां स्वामी ॥ तिन्दुकवृक्षः । इति
शब्दचन्द्रिका ॥
गालिः, पुं, (गाल्यते विक्रियते श्रवणमात्रेण
मनो यस्मात् येन वा । गल् + इञ् ।) शापः ।
इति त्रिकाण्डशेषः ॥ (यदुक्तं चिन्तामणौ ।
“ददति ददतु गालीर्गालिमन्तो भवन्तो
वयमपि तदभावाद्गालिदानेऽसमर्थाः ॥”)
गालितः, त्रि, (गल् + णिच् + कर्म्मणि क्तः ।) द्रवी-
कृतः । गलान इति भाषा ॥ यथा,—
“गालितस्य सुवर्णस्य षोडशांशेन सीसकम् ॥”
इति रत्नावली ॥
कृतगालनः । यथा । “तथा पचेत् यथा अगा-
लितमण्डश्चरुर्भवति ।” इति कालेशिः ॥
गालिनी, स्त्री, (गालयति द्रवीकरोत्यविद्यामिति ।
गल् + णिच् + णिनि + ङीप् ।) मुद्राविशेषः ।
यथा,—
“कनिष्ठाङ्गुष्ठकौ सक्तौ करयोरितरेतरम् ।
तर्ज्जनी मध्यमानामा संहता भुग्नवर्ज्जिता ॥
मुद्रैषा गालिनी प्रोक्ता शङ्खस्योपरिचालिता ॥”
इति तन्त्रसारः ॥